.. bhuusuuktam..

# ॥ भूसूक्तम् ॥

ॐ ॥ भूमि॑र्भू॒म्नाद्यौर्व॑रि॒णाऽन्तरि॑क्षं महि॒त्वा ।
उ॒पस्थे॑ ते देव्यदिते॒ऽग्निम॑न्ना॒द-म॒न्नाद्या॒याद॑धे ॥

आऽयङ्गौः पृश्नि॑रक्रमी॒ दस॑नन्मा॒तर॒ं पुनः॑ ।
पि॒तर॑ं च प्र॒यन्त्सुव॑ः ॥

त्रि॒ꣳशद्धाम॒ विरा॑जति॒ वाक्प॑त॒ङ्गाय॑ शिश्रिये ।
प्रत्य॑स्य वह॒ द्युभि॑ः ॥

अ॒स्य प्रा॒णाद॑पान॒त्य॑न्तश्च॑रति रोच॒ना ।
व्य॑ख्यन् महि॒षः सुव॑ः ॥

यत्त्वा॑ क्रु॒द्धः प॑रो॒वप॑म॒न्युना॒ यदव॑र्त्या ।
सु॒कल्प॑मग्ने॒ तत्तव॒ पु॒नस्त्वोद्दी॑पयामसि ॥

यत्ते॑ म॒न्युप॑रोप्तस्य पृथि॒वी-मनु॑दध्व॒से ।
आ॒दि॒त्या विश्वे॒ तद्दे॒वा वस॑वश्च स॒माभ॑रन् ॥

मे॒दिनी॑ दे॒वी व॒सुन्ध॑रा स्या॒द्वसु॑दा दे॒वी वा॒सवी॑ ।
ब्र॒ह्म॒व॒र्च॒सः पि॑तृ॒णाꣳ श्रोत्र॒ं चक्षु॒र्मन॑ः ॥

दे॒वी हिर॑ण्यगर्भिणी दे॒वी प्र॒सूव॑री ( प्र॒सोद॑री ) ।
रस॑ने ( सद॑ने ) स॒त्याय॑ने सीद ॥

स॒मु॒द्रव॑ती सावि॒त्री ह॒नो दे॒वी म॒ह्यङ्गी॑ ।
म॒हीधर॑णी म॒होव्यथि॑ष्टा ( म॒होध्यति॑ष्ठा ) श्शृ॒ङ्गे श्शृ॑ङ्गे य॒ज्ञे य॒ज्ञे विभी॒षणी॑ ॥

इन्द्र॑पत्नी व्या॒पिनी॑ सु॒रस॑रि॒दि॒ह (Accent unknown सरसिज इह ) ।
वा॒यु॒मती॑ जल॒शय॑नी श्रि॒य,न्धा॒ (Accent unknown स्वयंधा ) राजा॑ स॒त्यन्तो॒ ( धो॒ ) परि॑मेदिनी ॥

श्वोपरि॑धत्त॒ परि॑गाय ।(Accent Unknown सो परिधत्तंगाय )
वि॒ष्णु॒पत्नीं॑ म॒हीं दे॒वीं मा॒ध॒वीम् माध॑व॒प्रियां ।

लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभां ॥

ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि ।
तन्नो धरा प्रचोदयात् ॥

Encoded by Vijayaraghavan Bashyam (vayasya@yahoo.com )

---

Please send corrections to sanskrit@cheerful.com
Last updated May 30, 2001